# राष्ट्रियसंस्कृतविश्वविद्यालय:तिरुपतिः ,

## विशिष्टाचार्यप्रवेशपरीक्षा -2020

## प्रश्नपत्रम्

**विषयः – शिक्षाशास्त्रम्** **पूर्णाङ्काः -100**

1 अनुसन्धानं नाम किम् ?

A पुनः पुनः अन्वेषणम्

B समस्यायाः परिष्कारः

C समस्यासम्बद्धतथ्यानां वैज्ञानकरीत्या अन्वेषणम्

D प्रबन्धनिर्माणम्

2 इदम् अनुसन्धानस्य प्रथमं सोपानं भवति -

A सम्बन्धसाहित्याध्ययनम् B समस्यायाः अभिज्ञानम्

C प्राक्कल्पनानिर्माणम् D समस्यायाः परिष्कारान्वेषणं

3 अनुसन्धात्रा इदमवश्यं प्राप्तव्यम् -------

A अनुसन्धानविधीनां ज्ञानम् B अनुसन्धानप्रक्रियाज्ञानम्

C युक्तायुक्तविचक्षणासामर्थ्यम् D उपर्युक्तानि सर्वाण्यपि

4 अनुसन्धाने अस्य उपयोगः भवति -

A मुख्यस्रोतसः B गौणस्रोतसः

C मुख्य - गौण स्रोतसोः D एतेषु कस्यापि न

5 स्थानीयसमस्यानां परिष्काराय शिक्षकैः परामर्शदातृभिः क्रियमाणम् अनुसन्धानम् -

A क्रियानुसन्धानम् B अनुप्रयुक्तानुसन्धानम्

C वर्णनात्मकानुसन्धानम् D मौलिकानुसन्धानम्

6 दत्तांशस्य प्रकाराः -

A गुणात्मकदत्तांशः B संख्यात्मकदत्तांशः

C गुणात्मकः, संख्यात्मकश्च D एतेषु किमपि न

7 कस्मिन् अनुसन्धाने स्वतन्त्रचरस्य परिवर्तनं क्रियते -

A मौलिकानुसन्धाने B अनुप्रयुक्तानुसन्धाने

C क्रियानुसन्धाने D प्रयोगात्मकानुसन्धाने

8 स्तरीकृतन्यादर्शचयनप्रविधिः अत्र अन्तर्भवति -

A सम्भाव्यन्यादर्शचयनविधौ B असंभाव्यन्यादर्शचयनविधौ

C सम्भाव्ये असंभाव्ये अपि D कुत्रापि न

9 अनुसन्धात्रा नूतनज्ञानार्जनाय अत्यन्तम् उपयुक्तः मार्गः-

A विषयविशेषज्ञानाम् अभिप्रायः B वैज्ञानिकविधिः

C स्वीयानुभावः D शैक्षिकसंस्था

10 छात्राधिगमे दृश्यश्रव्योपकरणानां प्रभावः – कीदृशमनुसन्धानं भवति ?

A ऐतिहासिकम् B वर्णनात्मकम्

C प्रायोगिकम् D शैक्षिकसंस्था

11 सम्बद्धसाहित्याध्ययनस्य उद्देश्यमिदम् -

A समस्यासम्बद्धस्रोतसां सङ्ग्रहणम्

B समस्यासम्बद्धस्रोतसां पठनम्

C समस्यासम्बद्धस्रोतसां सूचीनिर्माणम् '

D समस्यासम्बद्धस्रोतसाम् अध्ययनम् अवगमनं च

12 संस्कृतक्षेत्रे सम्प्रति अध्यापकैःअनुभूयमानसमस्यानाम् अध्ययनार्थमुपयुक्तः विधिः -

A वर्णनात्मकविधि B सर्वेक्षणविधि

C तुलनाविधिः D व्यक्तिवृत्ताध्ययनम्

13 शोधोपकरणस्य उद्देश्यमिदम् –

A समस्यायाः उद्देश्यनिर्धारणम् B शोधरचना

C दत्तांशसङ्ग्रहणम् D जनसंख्यानिर्धारणम्

14 अस्मिन् अनुसन्धाने प्रश्नावली अत्यन्तम् उपकरोति –

A वर्णनात्मके B सर्वेक्षणे

C ऐतिहासिके D प्रायोगिके

15 अयं शोधविधिः न –

A निरीक्षणविधिः
B सर्वेक्षणविधिः
C ऐतिहासिकविधिः
D व्यक्तिवृत्ताध्ययनविधिः

16 जनसंख्यायाः प्रतिनिधिभूतः लघुसमूहः –

A उपकरणम्
B न्यादर्शः
C दत्तांशः
D छात्राः

17 Random number table उपयुज्य अस्य चयनं क्रियते

A सामान्यन्यादर्शः
B सांख्यकीयन्यादर्शः
C कोटान्यादर्शः
D अनुकूलन्यादर्शः

18 न्यादर्शचयनप्रकाराः कति?

A 1
B 2
C 3
D 4

19 स्तरीकृतन्यादर्शे एते अन्तर्भवन्ति –

A बालकाः
B बालिकाः
C बालकाः बालिकाः च
D कोऽपि न

20 सम्बन्धसाहित्ये एते अन्तर्भवन्ति

A प्रकाशितग्रन्थाः
B शोधप्रबन्धाः
C लघुशोधप्रबन्धाः
D उपर्युक्ताः सर्वेऽपि

21 शिक्षायाः त्रिमुखीप्रक्रियायाम् अयं नान्तर्भवति?

A शिक्षकः
B परिवारः
C बालकः
D विषयः

22 बौद्धशिक्षायाः प्रमुखं केन्द्रम् आसीत् ?

A गुरुकुलम्
B आश्रमः
C सङ्घः
D पाठशाला

23 पातञ्जलयोगशास्त्रस्य कति अङ्गानि सन्ति ?

A 2
B 8
C 5
D 4

24 वैशेषिकदर्शनानुगुणं कति गुणाः सन्ति ?

A नव B षोडशः

C चतुःविंशतिः D पञ्च

25 वैदिककाले शिक्षासत्रस्य प्रारम्भः कदा भवति स्म?

A कार्तिकपूर्णिमायाम् B चैत्रपूर्णिमायाम्

C श्रावणपूर्णिमायाम् D आश्विनपूर्णिमायाम्

26 अन्तर्दृष्टिप्रणाल्या अधिगमः कथं भवति ?

A व्यवहारेण B अभ्यासेन

C उदाहरणेन D अकस्मात्

27 सूत्ररचनार्थं पाणिनिना कः विधिराश्रितः?

A आगमनविधिः B निगमनविधिः

C सहयोगविधिः D व्याख्याविधिः

28 अभिक्रमिताधिगमः ---

A भाषाधिगमः B भाषाभ्यासः

C स्वाध्यायः D विज्ञानशिक्षा

29 वेदाङ्गभूतायाः शिक्षायाः अर्थः कः ?

A व्याकरणम् B भाषाशिक्षा

C वैदिकशिक्षा D उच्चारणशिक्षा

30 शाखीयाभिक्रमस्य प्रतिपादकः कः ?

A बी.एफ्.स्किन्नर् B एन्.ए.ए. क्रौडर्

C ई.एल्.थार्नडैक् D पावलोव्

31 प्राचीनकाले एषा परीक्षा प्रथिता आसीत् ?

A वस्तुनिष्ठपरीक्षा B बहुविकल्पपरीक्षा

C शलाकापरीक्षा D निबन्धात्मकपरीक्षा

32 सूक्ष्मशिक्षणे प्रत्येकं कौशलस्य शिक्षणे समयावधिः कियान् भवति ?

A 20-25 निमेषाः B 6-10 निमेषाः

C 30-35 निमेषाः D 35-40 निमेषाः

33 अभिक्रमिताधिगमस्य प्रवर्तकः कः ?

A सिड्नी.एल्.प्रेस्सी B बी.एफ्.स्किनर्

C ई.एल्.थोर्नडैक् D वुल्फगैङ्ग् कोहलेर्

34 पारम्परिकशिक्षोद्धेश्येषु इदं नान्तर्भवति-

A ज्ञानप्राप्तेः उद्धेश्यम् B मोक्षप्राप्तेः उद्धेश्यम्

C नैतिकविकासस्य उद्धेश्यम् D प्रौद्योगिकविकासस्य उद्धेश्यम्

35 सुन्दराक्षरलेखनार्थं कः सिद्धान्तः स्वीकर्त्तव्यः ?

A रुचिसिद्धान्तः B मौखिककार्यसिद्धान्तः

C अभ्याससिद्धान्तः D बहुमुखीसिद्धान्तः

36 छात्रेषु स्वानुशासनभावना केनोपायेन सम्वर्द्धनीया ?

A अनुशासनहीनान् दण्डयित्वा B कठोरनियमेन

C कार्याणामुत्तरदायित्वप्रदानपूर्वकेण D स्नेहेन

37 छात्राणां समस्या निवारणे शिक्षकस्य कतमः गुणः नितरामावश्यकः ?

A रुचिः B क्रोधः

C ज्ञानम् D कौशलम्

38 शिक्षणम् कीदृशी प्रक्रिया ?

A निरन्तरं प्रचाल्यमाना प्रक्रिया B कक्षायां प्रचाल्यमाना प्रक्रिया

C अध्यापकेन प्रचाल्यमाना प्रक्रिया D पुस्तकीयज्ञानाहरणस्य प्रक्रिया

39 'श्रमण' शब्दस्य कः अर्थः ?

A नूतनगुरुः B प्राचार्यः

C नूतनशिष्यः D सन्यासी

40 भारतीयशिक्षाप्रणाली कीदृशी आसीत् ?

A संस्कारप्रधाना B ब्रह्मज्ञानप्रधाना

C परम्पराप्रधाना D उपर्युक्तं त्रयमपि

41 छात्रेभ्यः किमर्थं मूल्यशिक्षा प्रदेया ?

A पाठ्यक्रमाङ्गतया B मानसिकविकासाय

C कण्ठस्थीकरणाय D उत्तमव्यक्तित्वविकासाय

42 'संस्कारानुपालनम्' इति कीदृशं मूल्यं भवति ?

A नैतिकमूल्यम् B सामाजिकमूल्यम्

C आध्यात्मिकमूल्यम् D मनोवैज्ञानिकमूल्यम्

43 अधोलिखितेषु कः विधिः मुस्लिम्कालीनशिक्षणे उपयुज्यते स्म ?

A दरस B बिस्मिल्लाह रस्म

C मक्तब् D मद्रासा-ए-नासीर्

44 सर्वोत्तममूल्याङ्कनव्यवस्था का ?

A आन्तरिकमूल्याङ्कनम् B सततव्यापकमूल्याङ्कनम्

C बाह्यमूल्याङ्कनम् D वार्षिकमूल्याङ्कनम्

45 बालकस्य सामाजिकीकरणे इदं प्रमुखं सहायभूतं साधनम् -

A गृहम् B पुस्तकम्

C विद्यालयः D मन्दिरम्

46 विद्यालयस्य हृदयमस्ति -

A प्रधानाध्यापकप्रकोष्ठः B पुस्तकालयः

C कार्यालयः D क्रीडाप्रकोष्ठः

47 भाषणकौशले नान्तर्भवति-

A उच्चारणम् B भाषणम्

C सम्भाषणम् D भावग्रहणम्

48 प्रशिक्षणम् कीदृशी प्रक्रिया ?

A विकासात्मिकाप्रक्रिया B योजनात्मिकाप्रक्रिया

C व्यवहारपरिवर्तनप्रक्रिया D उपर्युक्तं त्रयमपि

49 वैदिककालिकशिक्षायाः उद्देश्यं इदं नासीत् -

A आजीविकावाप्तिः B ज्ञानप्राप्तिः

C मोक्षप्राप्तिः D धार्मिकजीवनम्

50 ‘Idialism’ इत्यत्र मूलधातोः अर्थः कः ?

A आदर्शः B आचारः

C विचारः D उपचारः

51 ‘Kindergarton’ इत्येतत् कस्य सङ्कल्पना ?

A मरिया माण्टेसरी B फ्रोबेल्

C रूसो D जान् लाक्

52 किमनुशासनं श्रेष्टम् ?

A दमनात्मकमनुशासनम् B मुक्तात्मकमनुशासनम्

C आत्मानुशासनम् D न किमपि

53 उत्तमः शिक्षकः कः ?

A यः छात्रहितं करोति B यः मेधावी अस्ति

C यः परिश्रमी D यः प्रशिक्षितः

54 कक्ष्यायाम् उपवेष्टुम् आसन्दिकाः न सन्ति चेत् -

A न पाठनीयम् B प्रधानाध्यापकः सूचनीयः

C स्वयमेव आसन्दिकाः आनयेत् D सामञ्जस्येन कक्ष्यां निर्वहेत्

55 शिक्षकस्य उत्तरदायित्वम् -

A निर्दिष्टकालांशे अध्यापनम्

B कक्ष्यातिरिक्ते काले छात्रविकासाय कार्यकरणम्

C अनुशासनपूर्णम्-आदर्शजीवनम्

D पूर्वोक्तं सर्वमपि

56 अध्यापनम् एतदर्थं कर्तव्यम् ?

A पाठ्यक्रमस्य पूर्त्यर्थम् B छात्राणां सन्तुष्ट्यर्थम्

C निर्दिष्टोद्देश्यानि साधयितुम् D पूर्वोक्तं सर्वमपि

57 प्राचीनकाले गुरुकुलप्रवेशात् पूर्वं किं करणीयमासीत् ?

A अक्षराभ्यासः B उपनयनम्

C प्रवेशपरीक्षा D पित्रोः त्यागः

58 शिक्षा किमर्थं प्राप्तव्या ?

A व्यक्तित्वस्य समुचितविकासाय B स्वस्थसमाजाय

C राष्ट्रविकासाय D पूर्वोक्तत्रयम्

59 सुनीतिकुमारचटर्जी कस्य आयोगस्य अध्यक्षः आसीत् ?

A विश्वविद्यालयशिक्षायोगस्य B शिक्षायोगस्य

C माध्यमिकशिक्षायोगस्य D संस्कृतशिक्षायोगस्य

60 संस्कृतस्य कुठाराघातः केन कृतः ?

A कोठारी-आयोगेन B मुदलियार्-आयोगेन

C राधाकृष्णन्-आयोगेन D संस्कृतशिक्षायोगेन

61 शिक्षासमस्यासु का समस्या भारते स्वातन्त्र्यप्राप्तिकाले आसीत् ?

A वित्तीय-अभावः B भवनानां न्यूनता

C प्रशिक्षितशिक्षकाणाम् अभावः D सर्वमपि

62 शिक्षकः जीवनमूल्यानि कथं बोधयेत् ?

A कथया B स्वाचरणेन

C टिप्पण्या D महापुरुषसंसर्गेण

63 मनोविज्ञानम् इत्युक्ते किम् ?

A मनसः विज्ञानम् B मनोरोगस्य विज्ञानम्

C व्यवहारस्य विज्ञानम् D आत्मनः विज्ञानम्

64 मुस्लिंयुगीनशिक्षायाः प्रधानं वैकल्यं किम् ?

A विज्ञानशिक्षायाः अभावः B धार्मिकशिक्षायाः अभावः

C स्त्रीशिक्षायाः अभावः D चरित्रनिर्माणस्य अभावः

65 प्लेटोवर्यस्य पूर्वजः दार्शनिकः कः ?

A अरिष्टाटिल् B सोक्रटिस्

C रुसो D फ्रोबेल्

66 भारतीयः प्रकृतिवादी दार्शनिकः कः ?

A शङ्कराचार्यः B दयानन्दसरस्वती

C महात्मागान्धी D रबीन्द्रनाथ टैगोरः

67 आगष्ट् काम्टे कः ?

A समाजशास्त्रस्य प्रवर्तकः B शिक्षादर्शनस्य प्रवर्तकः

C मनोविज्ञानस्य प्रवर्तकः D राजनीतिशास्त्रस्य प्रवर्तकः

68 भारतस्य आद्या राष्ट्रियपाठ्यक्रमरूपरेखा (NCF) कदा संशोध्य प्रकाशिता?

A 1986 B 1996

C 2006 D 2016

69 बालानां सामान्याधिगमस्तरं सूचयन्ति एतानि सङ्केताक्षराणि -

A M.LA B M.B.A

C M.L.L D M.C.A

70 इयं 'द्वितीयावसरशिक्षा' इत्यपि सम्बोध्यते -

A विद्यालयशिक्षा B विश्वविद्यालयशिक्षा

C प्रौढशिक्षा D उच्चशिक्षा

71 एषः शिक्षकस्य शारीरिकगुणः नास्ति

A स्वास्थ्यम् B स्फूर्तिः (Energy)

C वेषभूषा D दया

72 'बोधनीया भाषा तयैव भाषया बोध्यते' अत्र कः विधिः?

A अनुवादविधिः B आगमनविधिः

C प्रत्यक्षविधिः D संरचनाविधिः

73 शिक्षणस्य एषः सिद्धान्तः आर्जितज्ञानस्य दृढीकरणाय बलं ददाति -

A मनोरञ्जनसिद्धान्तः B विभाजनसिद्धान्तः

C आवृत्तिसिद्धान्तः D चयनसिद्धान्तः

74 बालानां सुखबोधाय किं शिक्षणसूत्रम् अवलम्बनीयम् ?

A सरलात् जटिलं प्रति B जटिलात् सरलं प्रति

C जटिलात् जटिलं प्रति D जटिलात् जटिलातिजटिलं प्रति

75 अनुशासनपरिरक्षणोपायः कः ?

A सहगामिक्रियाणाम् आयोजनम् B समयस्य सदुपयोगः

C सर्जनात्मकमनुशासनम् D त्रयः अपि

76 'मनोविज्ञानम्' इति पदस्य सर्वादौ परिगृहीतः अर्थः -

A आत्मनः विज्ञानम् B चेतनायाः विज्ञानम्

C व्यवहारविज्ञानम् D त्रयमपि

77 शिक्षामनोविज्ञानस्य सर्वोत्कृष्टः विधिः एषः एव -

A सूत्रविधिः B प्रयोगविधिः

C प्रवचनविधिः D दण्डविधिः

78 प्रभावोत्पादकशिक्षणविधेः परिज्ञानाय शिक्षकेण किम् अवश्यं पठनीयम् ?

A विज्ञानम् B मनोविज्ञानम्

C शिक्षामनोविज्ञानम् D पशुमनोविज्ञानम्

79 माध्यमिकशिक्षायाः उद्देश्यमस्ति -

A प्रजातन्त्रिकनागरिकाणां निर्माणम् B व्यक्तित्वविकासः

C उभयमपि साधु D किमपि न साधु

80 राष्ट्रियशिक्षानीतिसमितेः (NEP – 2019) अध्यक्षः एषः -

A गोपालस्वामी. के B के. कस्तूरीरंगन्

C के. नारायणन् D डि. मारन्

81 राष्ट्रियशिक्षानीतौ नवोल्लिखिता शैक्षिकसंरचना एषा-

A 10 + 2 B 10 + 2 + 3

C 5 + 3 + 3 + 4 D 20 - 20

82 'विद्ययाऽमृतमश्नुते' इति ध्येयवाक्यं कस्याः संस्थायाः?

A NCERT B NCTE

C NCP D NPS

83 समावेशितविद्यालये कीदृशाः छात्राः प्रविशन्ति -

A सामान्यबालकाः B विशिष्टबालकाः

C सर्वविधबालकाः D केवलं बालिकाः

84 ‘यावज्जीवेत् सुखं जीवेत् नास्ति मृत्योरगोचरः’ इति वाक्यं केन दर्शनेन सम्बद्धं भवति ?

A जैनदर्शनेन
B चार्वाक दर्शनेन
C बौद्धदर्शनेन
D उत्तरमिमांसादर्शनेन

85 गृहकार्यदानस्य उद्देश्यमस्ति ?

A गृहेष्वपि बालोत्पीडनम्
B छात्राणां विषये प्रतीकारभावना
C गृहेऽपि अधिगमानुकूलवातावरणस्य परिकल्पना
D समययापनम्

86 छात्राणां पलायनप्रवृत्तिः कुत्र अन्तर्भवति ?

A शिक्षणोद्देश्ये
B शिक्षासिद्धान्ते
C शिक्षासमस्यासु
D शिक्षेतिहासे

87 न्यायमते ज्ञानाप्राप्तिसाधनानि कानि ?

A प्रमेयानि
B प्रमाणानि
C प्रयोजनानि
D निग्रहस्थानानि

88 बुद्धेः संरचना सिद्धान्तं (Structure of Intellectual Model) कः प्रतिपादितवान् ?

A थार्नडैक्
B स्पीयर् मेन
C पियाजे
D गिलफोर्ड्

89 फ्रायिड् मते अत्याधिकप्रभावशालिनी प्रेरणा का ?

A सङ्कल्पशक्तिः
B यौनप्रकृत्तिः
C बुभुक्षा
D पिपासा

90 समदोषः समाग्निश्च समाधातुमलक्रियः प्रसन्नात्मेन्द्रियमनाः स्वस्थ इत्यभिधीयते’। अत्र स्वास्थ्यं नाम .................।

A शरीरिकम्
B मानसिकम्
C आत्मिकम्
D पूर्वोक्तं सर्वम्

91 अन्तर्दृष्टिसिद्धान्तस्य प्रवर्तकः कः ?

A पतञ्जलिः B स्किन्नर्

C कोहलर् D हल्

92 शिक्षायाः अधिकारः (RTE Act) कदा क्रियान्वये आगतः?

A 4 Agugst. 2009 B 1 April. 2009

C 10 August. 2010 D 1 April. 2010

93 'A System of National Education' इति ग्रन्थस्य लेखकः कः ?

A अरविन्द घोषः B स्वामी विवेकानन्दः

C रवीन्द्रनाथ टैगोरः D जिड्डु कृष्णमूर्तिः

94 CAT – इति नामकस्य व्यक्तित्वपरीक्षणस्य निर्माता कः ?

A मोर्गान मुरे B हर्मन रोर्शा

C जे.एल. मोरिनो D लियोपोल्ड बेल्लक

95 2011 वर्षस्य जनगणनानुसारम् भारते महिलानां साक्षरताप्रतिशतम्-

A 74% B 65%

C 54% D 80%

96 स्वतन्त्रभारतस्य प्रथमा राष्ट्रियशिक्षानीतिः कदा निर्मिता ?

A 1968 B 1986

C 1992 D 2009

97 2012 वर्षस्य जस्टिस् वर्मासमितिः कया सह सम्बद्धा?

A वृत्तीयशिक्षया सह B अध्यापकशिक्षया सह

C माध्यमिकशिक्षया सह D स्त्रीशिक्षया सह

98 'यतो धर्मस्ततो जयः' इति कस्य ध्येयवाक्यम् ?

A लोकसभायाः B राज्यसभायाः

C भारतसर्वकारस्य D सर्वोच्चन्यायालयस्य

99 स्वतन्त्रभारते प्रथमः मुक्तविश्वविद्यालयः कः ?

A इन्द्रिरागान्धी राष्ट्रिय मुक्तविश्वविद्यालयः

B डा.बि.आर. अम्बेडकरमुक्तविश्वविद्यालयः

C कोटा मुक्तविश्वविद्यालयः

D नलन्दामुक्तविश्वविद्यालयः

100 ‘राष्ट्रियमाध्यमिकशिक्षाभियानम्’ इति योजना कदा समारब्धा ?

A 2002

B 2005

C 2009

D 2019

ANSWER KEY

M.Phil – Education

| *Q. No* | KEY | *Q. No* | KEY | *Q. No* | KEY | *Q. No* | KEY |
|---|---|---|---|---|---|---|---|
| 1 | C | 26 | D | 51 | B | 76 | A |
| 2 | B | 27 | A | 52 | C | 77 | B |
| 3 | D | 28 | C | 53 | A | 78 | C |
| 4 | C | 29 | D | 54 | D | 79 | C |
| 5 | A | 30 | B | 55 | D | 80 | B |
| 6 | C | 31 | C | 56 | C | 81 | C |
| 7 | D | 32 | B | 57 | B | 82 | A |
| 8 | A | 33 | B | 58 | D | 83 | C |
| 9 | B | 34 | D | 59 | D | 84 | B |
| 10 | C | 35 | C | 60 | A | 85 | C |
| 11 | D | 36 | C | 61 | D | 86 | C |
| 12 | B | 37 | D | 62 | B | 87 | B |
| 13 | C | 38 | A | 63 | C | 88 | D |
| 14 | B | 39 | C | 64 | C | 89 | B |
| 15 | A | 40 | D | 65 | B | 90 | D |
| 16 | B | 41 | D | 66 | D | 91 | C |
| 17 | A | 42 | B | 67 | A | 92 | D |
| 18 | B | 43 | A | 68 | A | 93 | A |
| 19 | C | 44 | B | 69 | C | 94 | D |
| 20 | D | 45 | C | 70 | C | 95 | B |
| 21 | B | 46 | B | 71 | D | 96 | A |
| 22 | C | 47 | D | 72 | C | 97 | B |
| 23 | B | 48 | D | 73 | C | 98 | D |
| 24 | C | 49 | A | 74 | A | 99 | B |
| 25 | C | 50 | C | 75 | D | 100 | C |